# Shri Rama Stava

# શ્રીરામસ્તવઃ

## Document Information

Text title : Shri Rama Stava 1

File name : rAmastavaH.itx

Category : raama

Location : doc_raama

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : From stotrArNavaH 04-22

Latest update : September 12, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 15, 2022

*sanskritdocuments.org*

# Shri Rama Stava

## શ્રીરામસ્તવઃ

ભજેઽહં સદા રામમિન્દીવરાભં
    ભવારણ્યદાવાનલાભાભિધાનમ્ ।
ભવાનીહૃદાભાચિદાનન્દરૂપં
    ભવાભાવહેતું ભવાદિપ્રપન્નમ્ ॥ ૧॥

સુરાનીકદુઃખૌઘનાશૈકહેતું
    નરાકારદેહં નિરાકારમીડ્યમ્ ।
પરેશં પરાનન્દરૂપં વરેણ્યં
    હરિં રામમીશં ભજે ભારનાશમ્ ॥ ૨॥

પ્રપન્નાખિલાનન્દદોહં પ્રસન્નં
    પ્રપન્નાર્તિનિશ્શેષનાશાભિધાનમ્ ।
તપોયોગયોગીશભાવાદિભવ્યં
    કપીશાદિમિત્રં ભજે રામમિત્રમ્ ॥ ૩॥

સદા ભોગભાજાં સુદૂરે વિભાન્તં
    ચિદાનન્દકન્દં સદારામવેશમ્ ।
વિદેહાત્મજાનન્દરૂપં સુરેશં
    મહેશં નરેશાનરામં પ્રપદ્યે ॥ ૪॥

મહાયોગમાયાવિશેષાનુયુક્ત્યા
    સુરાધીશલીલાનરાકારમૂર્તેઃ ।
સદાનન્દલીલાકથાપૂર્ણકર્ણાઃ
    સદાનન્દરૂપા ભવન્તીહ લોકે ॥ ૫॥

અહમ્માનપાનાભિમત્તઃ પ્રમત્તો
    ન વેદાખિલેશાભિમાનાભિમાનઃ ।
ઇદાનીં ભવત્પાદપદ્મપ્રસાદાત્
    ત્રિલોકાધિપત્યાભિમાનો વિનષ્ટઃ ॥ ૬॥

સ્ફુરદ્રત્નકેયૂરહારાભિરામં
    ધરાભારભૂતાસુરાનીકદાવમ્ ।
શરચ્ચન્દ્રવક્ત્રં લસત્પદ્મનેત્રં
    દુરાવારપારં ભજે રાઘવેશમ્ ॥ ૭॥

સુરાધીશનીલાભ્રનીલાઙ્ગકાન્તિં
    વિરાધાદિરક્ષોવધાલ્લોકશાન્તિમ્ ।
કિરીટાદિશોભં પુરારાતિલાભં
    ભજે રામચન્દ્રં રઘૂણામધીશમ્ ॥ ૮॥

લસચ્ચન્દ્રકોટિપ્રકાશાધિપીઠે
    સમાસીનમેકં સમાધાય સીતામ્ ।
સ્ફુરદ્ધેમવર્ણાં તટિત્પુઞ્જભાસાં
    ભજે રામચન્દ્રં નિવૃત્તાર્તિતન્ત્રમ્ ॥ ૯॥

ઇતિ શ્રીરામસ્તવઃ સમ્પૂર્ણઃ ।

Proofread by Aruna Narayanan

---

*Shri Rama Stava*

pdf was typeset on October 15, 2022

Please send corrections to *sanskrit@cheerful.com*